तत्पर्य्यायः । निभृतः २ प्रश्रितः ३ । इत्यमर-
भरतौ ॥ ( यथा, रघुवंशे । १४ । ७५ ।
"तपस्विसंसर्गविनीतसत्त्वे
तपोवने वीतभया वसास्मिन् ॥")
जितेन्द्रियः । ( यथा, तन्त्रसारे ।
"शान्तो दान्तः कुलीनश्च विनीतः शुद्धवेश-
वान् ॥")
अपनीतः । (यथा, महाभारते ।७।११०।५५।
"विनीतशल्यास्तुरगांश्चतुरो हेममालिनः ॥")
हृतः । इति मेदिनीकारहेमचन्द्रौ ॥ क्षिप्तः ।
इत्यजयपालः ॥ कृतदण्डः । इति स्मृतिः ॥
( अनुद्धतः । यथा, मनौ । ६ । ४१ ।
"तत्रात्मेन विनीतेन ज्ञानविज्ञानवेदिना ॥")
विनीतः, पुं, ( वि + नी + क्तः । ) सुवहाश्वः ।
तत्पर्य्यायः । साधुवाही २ । इत्यमरः । सुष्ठु-
वाहनशीलकः ३ । इति शब्दरत्नावली ॥ (यथा,
महाभारते । ७ । ११० । ५६ ।
"तांस्तदा रूप्यवर्णाभान् विनीतान् शीघ्र-
गामिनः ॥")
वणिक् । इति मेदिनी । ते, १५४ ॥ दमनकवृक्षः ।
( अस्य पर्य्यायो यथा,—
"उक्तो दमनको दान्तो मुनिपुत्रस्तपोधनः ।
गन्धोत्कटो ब्रह्मजटो विनीतः फलपत्रकः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥ )
शिक्षितवृषभादिः । इति राजनिर्घण्टः ॥
विनीतकं, क्ली पुं, वैनीतकम् । परम्परावाहनम् ।
इत्यमरटीकायां रायमुकुटः ॥
विनीयः, पुं, (वि + नी + "विपूयविनीयजित्या इति ।"
३ । १ । ११७ । क्यप्प्रत्ययेन निपातितः । )
कल्कः । इति मुग्धबोधव्याकरणम् ॥ (यथा,—
"एकातुरुष्कलघुलाभतया विनीयः ।"
इति वैद्यकचक्रपाणिसंग्रहे वातव्याधौ एला-
तैले ॥ ) पापम् । इति सिद्धान्तकौमुदी ॥
विनेता, [ ऋ ] पुं, (वि + नी + तृच् । ) राजा ।
आदेशके, त्रि । इति मेदिनी । ते, १५६ ॥
( यथा, रघुवंशे । १४ । २३ ।
"तेनास लोकः पितृमान् विनेत्रा ॥"
गुरुः । शिक्षकः । यथा, महाभारते ।११।२६।
"अर्ज्जुनस्य विनेतारमाचार्य्यं सात्यकेस्तथा ।
तं पश्य पतितं द्रोणं कुरूणां द्विजसत्तमम् ॥"
यथा च रघुवंशे । ८ । ९१ ।
"स तथेति विनेतुरुदारमतेः
प्रतिगृह्य वचो विससर्ज्ज मुनिम् ॥")
विनेयः, त्रि, (वि + नी + यत् ।) नेतव्यः । विपूर्व्व-
नीधातोर्यप्रत्ययेन निष्पन्नः ॥ दण्डनीयः । यथा,
"ज्योतिर्ज्ञानं तथोत्पातमविदित्वा तु ये नृणाम् ।
श्रावयन्त्यर्थलोभेन विनेयास्तेऽपि यत्नतः ॥"
विनेयाः दण्डनीयाः । इति ज्योतिस्तत्त्वम् ॥
विनोदः, पुं, ( वि + नुद + घञ् । ) कौतूहलम् ।
इति हलायुधः ॥ ( यथा, कथासरित्सागरे ।
१५ । १२५ ।
"बाधते तच्च नैकस्यात् सर्व्वं स मगधेश्वरः ।
तत्तत्र रचाद्दैतोश्च विनोदायतनस्य ताम् ॥")
क्रीड़ा । इति भूरिप्रयोगः ॥ ( यथा, भाग-
वते । ३ । १६ । २४ ।
"नैतावता त्र्यधिपतेर्बत विश्वभर्त्तु-
स्तेजःक्षतं त्वव न तस्य स ते विनोदः ॥"
अपनयनम् । यथा, शिशुपालवधे । १ । ४८ ॥
"विनोदमिच्छन्नथ दर्पजन्मनो
रणेन कण्ड्वास्त्रिदशैः समं पुनः ॥"
प्रमोदः । यथा, हितोपदेशे ।
"काव्यशास्त्रविनोदेन कालो गच्छति धीमताम् ।
व्यसनेन च मूर्खाणां निद्रया कलहेन वा ॥")
आलिङ्गनविशेषः । तल्लक्षणं यथा । नायको
नायिकाया दक्षिणपादं वामपादं वा स्वमध्य-
देशे स्वदक्षिणपादं वामपादं वा नायिकामध्य-
देशे निधाय वक्षसि वक्षः ओष्ठे ओष्ठं दत्त्वा
यदाश्लिषति तत् । इति कामशास्त्रम् ॥ राज-
गृहविशेषः । यथा,—
"दीर्घे त्रयो राजहस्ताः प्रसरे द्वौ प्रतिष्ठितौ ।
विनोद एव द्वाराणि त्रिंशत् कोष्ठद्वयं भवेत् ॥"
इति युक्तिकल्पतरुः ॥
"द्वादशैते गृहाण् वक्ष्ये तेषां लक्षणमग्रतः ।
सुनन्दः सर्व्वतोभद्रो भव्यो नान्दीमुखस्तथा ॥
विनोदश्च विलासश्च विजयो विमलस्तथा ।
रङ्गः केलिर्जयो वीरो द्वादशैते प्रकीर्त्तिताः ॥"
इति भविष्योत्तरपुराणम् ॥
वि(बि)न्दुः, पुं, ( बिदि अवयवे + बाहुलकादुः । )
जलकणा । तत्पर्य्यायः । पृषत् २ पृषतः ३
विप्रुट् ४ । इत्यमरः ॥ पृषन्ति ५ विप्रट् ६ । इति
तट्टीका ॥ ( यथा, पञ्चतन्त्रे ।
"जलबिन्दुनिपातेन क्रमशः पूर्य्यते घटः ।
स हेतुः सर्व्वशास्त्रस्य धर्म्मस्य च धनस्य च ॥")
दन्तक्षतविशेषः । भ्रुवोर्मध्यम् । रूपकार्थ-
प्रहृतिः । इति मेदिनी । दे,१०-११ ॥ अनुस्वारः ।
यथा । "बिन्दुद्विबिन्दुमात्रौ वर्णौ क्रमान्नुवौ संज्ञौ
स्तः ।" इति मुग्धबोधव्याकरणम् ॥ अपि च ।
"शिवो वह्निसमायुक्तो वामाक्षिबिन्दुभूषितः ।
एकाक्षरो महामन्त्रः श्रीसूर्य्यस्य प्रकीर्त्तितः ॥"
इति सूर्य्यकवचम् ॥

बिन्दूत्पत्तिर्यथा,—
"सच्चिदानन्दविभवात् सकलात् परमेश्वरात् ।
आसीच्छक्तिस्ततो नादो नादाद्बिन्दुसमुद्भवः ॥"
इति सारदातिलके १ पटलः ॥

अपि च ।
"आसीद्बिन्दुस्ततो नादो नादाच्छक्तिः समुद्भवा ।
नादरूपा महेशानी चिद्रूपा परमा कला ॥
नादाच्चैव समुत्पन्नः अर्द्धबिन्दुर्महेश्वरि ।
सार्द्धत्रितयबिन्दुभ्यो भुजङ्गी कुलकुण्डली ॥"
इति कुब्जिकातन्त्रे १ पटलः ॥
"बिन्दुर्नादो बीजमिति तस्य भेदाः समीरिताः ।
बिन्दुः शिवात्मको बीजं शक्तिर्नादस्तयोर्मिथः ॥
समवायः समाख्यातः सर्व्वागमविशारदैः ॥"
इति सारदातिलकः ॥
अन्यच्च ।
"बिन्दुः शिवात्मकस्तत्र बीजं शक्त्यात्मकं स्मृतम् ।
तयोर्योगे भवेन्नादस्ताभ्यो जातास्त्रिशक्तयः ॥"
इति क्रियासारः ॥
वि(बि)न्दुः, त्रि, ( वेत्ति तच्छीलः । विद ज्ञाने +
"बिन्दुरिच्छुः ।" ३ । २ । १६९ । इति उप्रत्ययो
नुमागमश्च निपात्यते । ) ज्ञाता । इत्यमरः ॥
दाता । इत्यजयपालः ॥ वेदितव्यः । इति
शब्दरत्नावली ॥
वि(बि)न्दुचित्रकः, पुं, (बिन्दुभिश्चिह्नविशेषैश्चित्रकः
इव । ) मृगभेदः । इति शब्दरत्नावली ॥
वि(बि)न्दुजालं, क्ली, ( बिन्दूनां जालम् । ) हस्ति-
शुण्डोपरिविचित्रबिन्दुसमूहः । इति हेमचन्द्रः ॥
वि(बि)न्दुजालकं, क्ली, ( बिन्दूनां जालकम् । )
गजस्य मुखादिस्थो बिन्दुसमूहः । तत्पर्य्यायः ।
पद्मकम् २ । इत्यमरः । पद्मम् ३ । अतएव
पद्मी हस्तीति भरतः ॥
वि(बि)न्दुतन्त्रः, पुं, ( बिन्दुचिह्नं तन्त्रं यस्य । )
अक्षः । इति हारावली ॥ तुरङ्गकः । यथा,—
"बिन्दुतन्त्रः पुमान् शारिफलके च तुरङ्गके ॥"
इति पवर्गीयवादौ मेदिनी ॥
वि(बि)न्दुपत्रः, पुं, (बिन्दुः पत्रे यस्य ।) भूर्य्यवृक्षः ।
इति रत्नमाला ॥
वि(बि)न्दुरेखकः, पुं, ( बिन्दुविशिष्टा रेखा यत्र ।
कन् ।) पक्षिभेदः । इति शब्दचन्द्रिका ॥
वि(बि)न्दुवासरः, पुं, ( बिन्दुपातस्य वासरः ।) गर्भे
सन्तानोत्पत्तिकारकशुक्रपातदिनम् । इति
ज्योतिषम् ॥
वि(बि)न्दुसरः, [ स् ] क्ली, ( बिन्दुनामकं सरः ।)
सरोवरविशेषः । यथा,—
"अभ्युत्तरेण कैलासं शिवं सर्व्वौषधिं गिरिम् ।
गौरन्तु पर्व्वतश्रेष्ठं हरितालमयं प्रति ॥
हिरण्यशृङ्गः सुमहान् दिव्यौषधिमयो
गिरिः ।
तस्य पादे महद्दिव्यं सरः काञ्चनसन्निभम् ॥
रम्यं बिन्दुसरो नाम यत्र राजा भगीरथः ।
गङ्गार्थे स तु राजर्षिरुवास बहुलाः समाः ॥
दिवं यास्यन्ति मे पूर्व्वे गङ्गातोयपरिप्लुताः ।
तत्र त्रिपथगा देवी प्रथमन्तु प्रतिष्ठिता ॥
सोमपादात् प्रसूता सा सप्तधा प्रतिभज्यते ।
यूपा मणिमयास्तत्र चितयश्च हिरण्मयाः ॥
तत्रेष्ट्वा क्रतुभिः सिद्धः शक्रः सुरगणैः सह ।
दिव्यच्छायापथस्तत्र नक्षत्राणान्तु मण्डलम् ॥
दृश्यते भास्वरा रात्रौ देवी त्रिपथगा तु सा ।
अन्तरीक्षं दिवञ्चैव भावयित्वा भुवं गताः ॥
भवस्य खाङ्गे पतिता संरुद्धा योगमायया ।
तस्या ये बिन्दवः केचित् क्षुब्धायाः पतिता
भुवि ।
कृतस्तु तैर्बिन्दुसरस्ततो बिन्दुसरः स्मृतम् ॥"
इति मात्स्ये । १२० । २७—३३ ॥
विन्ध्यपत्री, क्ली, ज्वरापहा । इति शब्दचन्द्रिका ॥
बेलशुँटा इति भाषा ॥